# वार्तालापं

**प्रश्न 1. मञ्जूषायां प्रदत्तपदैः 'जयपुरभ्रमणम्' इति विषये मित्रयोः परस्परं वार्तालापं पूरयतु--**

**मित्रैः, जयपुरं, कार्यक्रमः, दर्शनीयम्, भ्रमणार्थम्, यात्रानुभवविषये, द्रक्ष्यामः**

**उत्तरम्---**

विनोदः - अंकित! श्वः भवान् कुत्र गमिष्यति?

अंकितः - अहं जयपुरं गमिष्यामि।।

विनोदः - तत्र किमपि कार्यं वर्तते? अथवा भ्रमणार्थम् एव गच्छति?

अंकितः - कार्यं नास्ति, अहं तु मित्रैः सह भ्रमणार्थं गच्छामि।

विनोदः - जयपुरे कुत्र-कुत्र भ्रमणस्य कार्यक्रमः अस्ति?

अंकितः - वयं तत्र आमेर-दुर्गं, जयगढ़दुर्गं, गोविन्ददेव-मन्दिरं च द्रक्ष्यामः।

विनोदः - तत्र नाहरगढ़-दुर्गमपि पश्यतु । तदपि दर्शनीयम् अस्ति।

अंकितः - यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।

विनोदः - बाढ़म् । मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मिलिष्यावः। तदा यात्रानुभवविषये वार्तालापं करिष्यावः।

**प्रश्न 2.मंजूषातः उपयुक्तपदानि गृहीत्वा पुत्रस्य अध्ययनविषये पितापुत्रयोः वार्तालापं पूरयतु-**

**अध्यापकः, विषये, गणिते, व्यवस्थां, स्थानान्तरणम्, अध्ययनं, समीचीनं, काठिन्यम्**

पिता - रमेश! तव ................ कथं प्रचलति?

रमेशः - हे पितः! अध्ययनं तु ................. प्रचलति।

पिता - कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं ................. अनुभवसि?

रमेशः - आम्! ............... मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं

गणितस्य ............. नास्ति।

पिता - त्वं पूर्वं तु माम् अस्मिन् ................ न उक्तवान्!

रमेशः - पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य ............ अन्यत्र अभवत्।

पिता - अस्तु । अहं तव कृते गृहे एव गणिताध्यापकस्य .............. करिष्यामि।

रमेशः - धन्यवादाः।

**उत्तरम्–**

पिता - रमेश! तव अध्ययनं कथं प्रचलति?

रमेशः - हे पितः! अध्ययनं तु समीचीनं प्रचलति ।

पिता - कोऽपि विषयः एतादृशः अस्ति यस्मिन् त्वं काठिन्यम् अनुभवसि?

रमेशः - आम्! गणिते मम स्थितिः सम्यक् नास्ति। यतोहि अस्माकं विद्यालये इदानीं गणितस्य अध्यापकः नास्ति। .

पिता - त्वं पूर्वं तु माम् अस्मिन् विषये न उक्तवान् !

रमेशः - पूर्वं तु अध्यापक-महोदयः आसीत् परं एकमासात् पूर्वमेव तस्य स्थानान्तरणम् अन्यत्र अभवत्।

पिता - अस्तु। अहं तव कृते गृहे एव गणिताध्यापकस्य व्यवस्था करिष्यामि।

रमेशः - धन्यवादाः।

**प्रश्न 3.मञ्जूषायाः उपयुक्तपदानि गृहीत्वा चिकित्सालय-दर्शनम्' इति विषये वार्तालापं पूरयत।**

**तत्, त्वम्, पीडितः, कुत्र, उपचारम्, के, अस्ति, चिकित्सालयभवनम्**

पुनीतः-सुरेश! त्वं ................. गच्छसि?

सुरेशः-पुनीत! ................. अपि आगच्छ।

पुनीतः-अरे! .................. किं भवनम् अस्ति?

सुरेशः-तत् ................. अस्ति। आवाम् अपि मातुलं द्रष्टुं चलावः।

पुनीतः-सः केन रोगेण .................. अस्ति ?

सुरेशः-सः उच्चरक्तचापेन पीडितः ..................।

पुनीतः-ते श्वेतप्रावारकधारकाः .................. सन्ति? ते किं कुर्वन्ति?

सुरेशः-ते चिकित्सकाः सन्ति। ते .................. कुर्वन्ति।

**उत्तरम्---**

पुनीतः- सुरेश! त्वं कुत्र गच्छसि?

सुरेशः- पुनीत! त्वम् अपि आगच्छ ।

पुनीतः- अरे! तत् किं भवनम् अस्ति? सुरेशः- तत् चिकित्सालयभवनम् अस्ति । आवाम् अपि मातुलं द्रष्टुं चलावः। पुनीतः- सः केनं रोगेण पीडितः अस्ति?

सुरेशः- सः उक्तरक्तचापेन पीडितः अस्ति।

पुनीतः- ते श्वेतप्रावारकधारकाः के सन्ति? ते किं कुर्वन्ति?

सुरेशः- ते चिकित्सकाः सन्ति। ते उपचारं कुर्वन्ति।

**प्रश्न 4. मञ्जूषायाः उचितपदैः 'वसतिस्वच्छता' इतिविषये वार्तालापं पूरयत।**

**नालीनां, सुन्दरं, स्वच्छता, कदा, श्वः, वामतः, आरभ्य, त्वं**

महेशः - निरञ्जन! ................ रविवासरः, तव का योजना वर्तते?

निरञ्जनः - अरे ................. न जानासि? रविवासरे सर्वे मिलित्वा वसते: स्वच्छता करणीयास्ति ।

महेशः - अहो! उत्तमः विचारः। सर्वे: श्वः ................. गम्यते?

निरञ्जनः - प्रातः अष्टवादनाद् ................. कार्यमिदं भविष्यति।

महेशः - पूर्वं कस्य भागस्य ............... करिष्यते?

निरञ्जनः - ..................विद्यामानस्य अद्यस्य उद्यानस्य आदौ करिष्यामः ।

महेशः - तेन तद् रमणीयं ................... च भविष्यति।

निरञ्जनः - .................. स्वच्छता योजनायां स्वीकृता एव।

**उत्तरम्—**

महेशः - निरञ्जन! श्वः रविवासरः, तव का योजना वर्तते?

निरञ्जन:- अरे त्वं न जानासि? रविवासरे सर्वे मिलित्वा वसते; स्वच्छता करणीयास्ति।

महेशः - अहो ! उत्तमः विचारः। सर्वेः श्वः कदा गम्यते?

निरञ्जनः- प्रातः अष्टवादनाद् आरभ्य कार्यमिदं भविष्यति।

महेशः - पूर्वं कस्य भागस्य स्वच्छता करिष्यते?

निरञ्जन:- वामतः विद्यामानस्य अद्यस्य उद्यानस्य आदौ करिष्यामः ।

महेशः - तेन तद् रमणीयं सुन्दरं च भविष्यति।

निरञ्जनः- नालीनां स्वच्छता योजनायां स्वीकृता एव।

**प्रश्न 5. मञ्जूषातः उचितानि पदानि गृहीत्वा 'धूम्रपान-निवारणाय' इति विषये गुरुशिष्ययोः वार्तालापं पूरयत**

**गन्तुम्, अस्य, तुभ्यं, धूम्रपानं, स्वास्थ्य, प्रेरणीयाः, मया, दुर्व्यसनस्य**

सोहनः - गुरुवर! अहं पश्यामि विद्यालये केचन छात्रा ......... कुर्वन्ति ।

गुरुः - वत्स! धूम्रपानं .................. विनाशकमस्ति ।

सोहनः - गुरुवर! कोऽस्य ............... निवारणोपायः?

गुरुः - पुत्र! जन-जागर्तिरेव .................. दुर्व्यसनस्य निवारणोपायः।

सोहनः - गुरुवर! ............... किं करणीयम्?

गुरुः - त्वया छात्राः ................. यत् अस्माभिः धूम्रपानं न करणीयम् ।

सोहनः - गुरुवर! एवमेव करोमि। अधुना अहं ............. इच्छामि।

गुरुः - वत्स! महत्त्वपूर्ण विषयोपरि वार्ता कर्तुं ............ धन्यवादं ददामि।

**उत्तरम्—**

सोहनः - गुरुवर! अहं पश्यामि विद्यालये केचन छात्रा धूम्रपानं कुर्वन्ति।

गुरुः - वत्स! धूम्रपानं स्वास्थ्य-विनाशकमस्ति।

सोहनः - गुरुवर ! कोऽस्य दुर्व्यसनस्य निवारणोपायः?

गुरुः - पुत्र! जन-जागर्तिरेव अस्य दुर्व्यसनस्य निवारणोपायः।

सोहनः - गुरुवर! मया किं करणीयम्?

गुरुः - त्वया छात्राः प्रेरणीयाः यत् अस्माभिः धूम्रपानं न करणीयम्।

सोहनः - गुरुवर! एवमेव करोमि। अधुना अहं गन्तुम् इच्छामि।

गुरुः - वत्स! महत्त्वपूर्ण विषयोपरि वार्ता कर्तुं तुभ्यं धन्यवादं ददामि। .

**प्रश्न 6. मञ्जूषातः उचितानि पदानि चित्वा अधोलिखितं 'शिक्षक-छात्राः तयोमध्ये वार्तालापं' पुरयत--**

**वयम्, वाद्ययन्त्राणि, शोभनम्, परन्तु, गातुम्, महोदये, इच्छन्ति, गायामः**

शिक्षकः - छात्राः! किं भवन्तः किञ्चित् प्रष्टुम् (i) ..........?

छात्राः - महोदये! (ii) .................. तु गातुम् इच्छाम।

शिक्षकः - गातुम् इच्छन्ति (iii).................. अहं तु (iv).................. न समर्था।

छात्राः - (v) .................. वयं गास्यामः।

शिक्षकः - (vi)................... अहम् अपि गास्यामि।

छात्राः - (vii).................. यदि सन्ति, शोभनम्।

शिक्षकः - एवम् तदा (viii) .................. वयं।

**उत्तरम्---**

शिक्षकः - छात्राः ! किं भवन्तः किञ्चित् प्रष्टुम् इच्छन्ति?

छात्राः - महोदये! वयं तु गातुम् इच्छाम।

शिक्षकः . - गातुम् इच्छन्ति परन्तु अहं तु गातुं न समर्था ।

छात्राः - महोदये! वयं गास्यामः।

शिक्षकः - शोभनम्, अहम् अपि गास्यामि।

छात्राः - वाद्ययन्त्राणि यदि सन्ति, शोभनम्।

शिक्षकः - एवम् तदा गायामः वयं।

**प्रश्न 7. मञ्जूषायाः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये वार्तालापं पूरयतु---**

**कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमाः, शक्नोमि, अस्माकम्, योगदिवसे, अन्तराष्ट्रियय़ोगदिवसः**

पुत्रः -भोः पितः! ................ 29 दिनांके कः दिवसः भवति?

पिता-अरे! तस्मिन् दिने तु .................. भवति ।

पुत्रः-योगदिवसे के .... ................ भवन्ति?

पिता-................ विश्वेजनाः प्रणायामं व्यायामं च कुर्वन्ति।

पुत्रः-योगेन .................. स्वास्थ्यं सम्यक् भवति वा?

पिता-आम्। ये योगं ................. ते रुग्णाः न भवन्ति ।

पुत्रः-तर्हि अहम् अपि योगं कर्तुं ................ वा?

पिता-किमर्थं न, .................. आवां योगं करवाव।

**उत्तरम्-**

'पुत्रः- भोः पितः! जूनमासस्य 29 दिनांके कः दिवसः भवति?

पिता- अरे! तस्मिन् दिने तु अन्ताराष्ट्रिययोगदिवसः भवति।

पुत्रः- योगदिवसे के कार्यक्रमाः भवन्ति?

पिता- योगदिवसे विश्वेजनाः प्रणायामं व्यायामं च कुर्वन्ति।

पुत्रः- योगेन अस्माकं स्वास्थ्यं सम्यक् भवति वा?

पिता- आम् । ये योगं कुर्वन्ति ते रुग्णाः न भवन्ति।

पुत्रः- तर्हि अहम् अपि योगं कर्तुं शक्नोमि वा?

पिता- किमर्थं न, आगच्छ आवां योगं करवाव।

**प्रश्न 8. मञ्जूषातः उचितानि पदानि चित्वा पिता-पुत्रयोः सम्भाषणं लिखत-**

**आपणम्, शीघ्रम्, पुस्तकम्, फलानि, करोषि, शतम्, स्यूतम्, आगच्छामि**

पिता - पुत्र! किं..................त्वम्?

पुत्रः - ...................पठामि, पितः।।

पिता - पुत्र!...................गत्वा आगच्छसि किम्?

पुत्रः - पितः!. ................लिखित्वा गच्छामि।

पिता - आपणतः...................आनय।

पुत्रः - ...................रूप्यकाणि यच्छतु ।

पिता -................नीत्वा आपणं गच्छ।

पुत्रः - अहं गत्वा शीघ्रम्...................।

**उत्तरम्–**

पिता - पुत्र! किं करोषि त्वम्?

पुत्रः - पुस्तकं पठामि, पितः।

पिता - पुत्र! आपणं गत्वा आगच्छसि किम्?

पुत्रः - पितः! शीघ्रं लिखित्वा गच्छामि।

पिता - आपणतः फलानि आनय।

पुत्रः - शतम् रूप्यकाणि यच्छतु।

पिता - स्यूतम् नीत्वा आपणं गच्छ।

पुत्रः - अहं गत्वा शीघ्रम् आगच्छामि।